## मित्रे चर्षौ। (१३०/१०४०)

मित्रे चोत्तरपदे ऋषावभिधेये [1]विश्वस्य दीर्घो भवति। विश्वामित्रो नाम ऋषिः। ऋषौ इति किम्? [2]विश्वमित्रो माणवकः॥

## मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ। (१३१/३६३४)

मन्त्रविषये सोम अश्व इन्द्रिय विश्वदेव्य इत्येतेषां मतुप्प्रत्यये परतः दीर्घो भवति। 'सोमावती' (ऋ. १०.९७.७)। 'अश्वावती' (ऋ. १०.९७.७)। 'इन्द्रियावती' (तै. सं. २.४.२.१)। 'विश्वदेव्यावती' (तै. सं. ४.१.६.१)॥

## ओषधेश्च विभक्तावप्रथमायाम्। (१३२/३६३४)

मन्त्रे इति वर्तते। ओषधिशब्दस्य विभक्तावप्रथमायां परतः दीर्घो भवति। ओषधीभिरपीतत्। 'नमः पृथिव्यै नम ओषधीभ्यः (तै. आ. २.१२.१)। विभक्तौ इति किम्? ओषधिपते। अप्रथमायाम् इति किम्? [3]स्थिरेयमस्त्वोषधिः॥

## ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्। (१३३/३६३४)

[4]ऋचि विषये 'तु नु घ मक्षु तङ् कु त्र उरुष्य इत्येषां दीर्घो भवति। 'आ तू न इन्द्र वृत्रहन्' (वा. सं. ३.६५)। नु – [5]नू करणे। घ – 'उत वा [6]घा स्यालात्' (ऋ. १.१०९.२)। मक्षु – '[7]मक्षू गोमन्तमीमहे' (ऋ. ८.३३.३)। तङ् – 'भरता जातवेदसम्' (ऋ. १०.१७६.२)। तङः इति थादेशस्य ङित्वपक्षे ग्रहणं, तेनेह न भवति, 'शृणोत ग्रावाणः' (तै. सं. १.३.१३.१)। कु – [8]कूमनः। त्र – अत्रा गौः। उरुष्य – 'उरुष्या णो' (ऋ. १.९१.१५)॥

## इकः सुञि। (१३४/३६३६)

सुञ् निपातो गृह्यते। इगन्तस्य[9] सुञि परतो मन्त्रविषये दीर्घो भवति। 'अभी षु णः सखीनाम्' (ऋ. ४.३१.३)। 'ऊर्ध्व ऊ षु ण ऊतये' (ऋ. १.३६.१३)। 'सुञः' (८.३.१०७/३६४४) इति षत्वम्, 'नश्च धातुस्थोरुषुभ्यः' (८.४.२७/३६४९) इति णत्वम्॥

## द्व्यचोऽतस्तिङः। (१३५/३६३७)

ऋचि इति वर्तते। द्व्यचस्तिङन्तस्य अतः ऋग्विषये दीर्घो भवति। 'विद्मा हि त्वा [10]गोपतिं शूर गोनाम्' (ऋ. १०.४७.१)। 'विद्मा [11]शरस्य पितरम्' (अ. वे. १.२.१)। द्व्यचः इति किम्? 'अश्वा भवत वाजिनः (वा. सं. ९.६)। अतः इति किम्? 'आ देवान् वक्षि यक्षि च' (ऋ. ५.२६.१)॥

---

1. विश्वशब्दस्य ह. 2. विश्वमित्रको क. 3. स्थिरेयं समास्त्वोषधिः ड.क. 4. तङ् इति प्रत्याहार–ग्रहणम् इत्यधिकम् ह. 5. नूमर्तः ब. फ, नूष्णतः ह. 6. घा लस्यात् क. 7. मक्षूदेववतो रथः ड. 8. कूमवन् ह. 9. निपातस्य इत्यधिकम् फ. 10. सत्पतिं मुद्रितः पाठः 11. तस्य मुद्रितः पाठः